শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

## শ্রী কূরং তিরুৱালি নরসিংহ দাসেন কৃতা

# ॥ শ্রী নৱরত্নমালা ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী নৱরত্নমালা ॥

কাষায দণ্ড মুদ্ধৃত্য ৱিলসচ্ছ্রীমদাণ্ডৱঃ।
শ্রীমুষ্ণ জনিতঃ শ্রীমান্ শ্রেষ্ঠো ৱৈষ্ণৱ পালনে॥ **1** ॥

জ্ঞানেন যজ্ঞ তপসা শিষ্যান্ শাস্তি চ যো গুরুঃ।
তমহং শিরসা ৱন্দে শ্রীমদাণ্ডৱ মামুনিম্॥ **2** ॥

ৱেদ ৱেদান্ত ৱিদ্যাসু নিষ্ণাতো মুনিপুঙ্গৱঃ।
সতাং সদসি রক্তোঽযং রঙ্গরামানুজো যতিঃ॥ **3** ॥

দর্শনে সূর্যৱৎ ভাতি ভাষণে স্বামিদেশিকঃ।
সৌহার্দে ভাষ্যকারোঽযং শ্রীমদাণ্ডৱ মামুনিঃ॥ **4** ॥

প্রপঞ্চে সর্ৱ দিগ্ভাগে ৱর্তন্তে শিষ্য কোটযঃ।
তে সর্ৱে স্বামিনং যান্তি জন্ম সাফল্যসিদ্ধযে॥ **5** ॥

কল্যাণ কার্য কর্তারং সাধু সজ্জন পোষকম্।
মানৱোদ্ধরণে মগ্নং যতিরাজমহং ভজে॥ **6** ॥

ৱেদ ৱেদান্ত ৱিদুষং পাদুকারাধনে রতম্।
জ্ঞানিনামগ্রগণ্যং তম্ অপরং দেশিকং ভজে॥ **7** ॥

কাযেন মনসা ৱাচা নিত্যং পাদাঽভিৱন্দনম্।
ৎৱয্যর্পিতমনো বুদ্ধিং দেহি মে মুনিপুঙ্গৱ॥ **8** ॥

ৱন্দে ৱৈষ্ণৱ পোষকং যতিৱরং সর্ৱার্থসিদ্ধিপ্রদম্
শিষ্যাণাং হৃদযঙ্গমং গুণনিধিং শাস্ত্রার্থ সদ্বোধকম্।

দীনানাং হিতকারকং শুভকরং লোকে হিতার্থ প্রদম্
আরুদ্রা জনিতং মুনিত্রযমুনিং রঙ্গেতি নামাঙ্কিতম্॥ **9**॥

॥ ইতি শ্রী নৰরত্নমালা সমাপ্তা॥